योषिद्वैरस्य कारणम् ॥ १ ॥ क्लेशे शरणं भिषक् ॥ २ ॥ यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ॥ ३ ॥ तृणं ब्रह्मविदः स्वर्गस्तृणं शूरस्य जीवितम् ॥ ४ ॥ बाहुभिः क्षत्रियाः शूरा वाग्भिः शूरा द्विजातयः ॥ ५ ॥



सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥ ६ ॥ न वैद्यः प्रभुरायुषः ॥ ७ ॥ सर्वः पदस्थस्य सुहृद्बन्धुरापदि दुर्लभः ॥ ८ ॥ औषधं न गतायुषाम् ॥ ९ ॥ वृक्षं प्रति विद्योतते[1] विद्युत् ॥ १० ॥ न जलौकसामङ्गे जलौका[2] लगति ॥ ११ ॥ तपत्यादित्यवन्नूपश्चक्षूंषि च मनांसि च[3] ॥ १२ ॥

1) Korijen द्युत्+वि 2) § 35, 1c, 84. 3) Naime svojim pogledom. Usp. § 21, 26, 33b.

**331**. Uz § 87 – 98.

धनवान्बलवाँल्लोके[1] ॥ १ ॥ त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः ॥ २ ॥ यथा राजा तथा प्रजाः ॥ ३ ॥ जातस्य ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ ४ ॥ दुर्ग्राह्यः पाणिना वायुर्दुःस्पर्शः पाणिना शिखी ॥ ५ ॥ क्षमा रूपं तपस्विनः ॥ ६ ॥ सर्वमुत्पादि भङ्गुरम् ॥ ७ ॥ आत्मैवात्मनो[2] बन्धुरात्मैव[3] रिपुरात्मनः ॥ ८ ॥ रोगी देवताभक्तो वृद्धा च वेश्या तपस्विनी ॥ ९ ॥ न राजानं विना राज्यं बलवत्स्वपि[4] मन्त्रिषु ॥ १० ॥ प्रायेण ज्येष्ठाः पितृषु वल्लभा मातॄणां च कनीयांसः ॥ ११ ॥ आकिंचन्यं धनं विदुषाम् ॥ १२ ॥ महीयांसः प्रकृत्या मितभाषिणः ॥ १३ ॥ मतिर्बलाद्गरीयसी ॥ १४ ॥ अविद्वांश्चैव[5] विद्वांश्च ब्राह्मणो दैवतं महत् ॥ १५ ॥ बलीयः सर्वतो[6] दिष्टं पुरुषस्य विशेषतः ॥ १६ ॥ अर्थिनो राजानो हिरण्येन भवन्ति ॥ १७ ॥

भार्यायाः सुन्दरः स्निग्धो वेश्यायाः सुन्दरो धनी ।
श्रीदेव्याः सुन्दरः शूरो भारत्याः सुन्दरः सुधीः ॥ १८ ॥

1) § 31b. 2) § 20b, 19. 3) § 34a. 4) § 21. lokativ apsolutni 5) § 32. 6) Abl. (§ 59) kod komparativa.

**332**. Uz § 111 – 121.

यद्भावि तद्भवतु ॥ १ ॥ यस्यार्थास्तस्य मित्राणि ॥ २ ॥ मनसि परितुष्टे[1] को ऽर्थवान्को दरिद्रः ॥ ३ ॥ किमभ्यासेन दुष्करम् ॥ ४ ॥ अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् ॥ ५ ॥ आपत्सु किं विषादेन संपत्तौ विस्मयेन किम् ॥ ६ ॥ सर्वे मनुष्या अल्पेन यत्नेन महतो ऽर्थानाकाङ्क्षन्ति[2] ॥ ७ ॥ यो यद्वपति बीजं लभते सो ऽपि तत्फलम् ॥ ८ ॥ यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम् ॥ ९ ॥ तद्भाग्यं धनस्यैव यन्नाश्रयति[3] सज्जनम् ॥ १० ॥ परार्थं यो ऽवटं कर्ता तस्मिन्स पतति ध्रुवम् ॥ ११ ॥

1) Lok. apsol. 2) Korijen काङ्क्ष् + आ. 3) Korijen श्रि + आ i § 26, 19.

**333**. Uz § 140 – 143.

नदी कूलानि रुजति ॥ १ ॥ रजः किरति मारुतः ॥ २ ॥ आत्मानं पश्य को ऽहम् ॥ ३ ॥ सर्वो मन्यते लोक आत्मानं बुद्धिमत्तरम् ॥ ४ ॥ दिवा

पश्यति नोलूकः काको नक्तं न पश्यति ॥ ५ ॥ अन्तकाले भूतानि मुह्यन्तीति पुराश्रुतिः ॥ ६ ॥ दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ ७ ॥ एको न गच्छेदध्वानम् ॥ ८ ॥ नीचाः कलहमिच्छन्ति ॥ ९ ॥ निर्दोषो नैव जायते ॥ १० ॥ नीचैर्गच्छत्युपरि च दशा ॥ ११ ॥ विद्यया सार्धं म्रियेत न विद्यामूषरे वपेत् ॥ १२ ॥ नैष स्थाणोरपराधो यदेनमन्धो न पश्यति ॥ १३ ॥ यावन्न विन्दते जायां तावदर्धो भवेत्पुमान् ॥ १४ ॥ चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ॥ १५ ॥ चिरकालं पोषितो ऽपि दशत्येव भुजंगमः ॥ १६ ॥

अनारतं प्रतिदेशं प्रतिदिशं जले स्थले ।
जायन्ते च म्रियन्ते च बुद्बुदा इव वारिणि ॥ १७ ॥

**334.** Uz § 147 – 158.

श्येनः कपोतानत्तीति स्थितिरेषा सनातनी ॥ १ ॥ गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः[1] ॥ २ ॥ त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः[2] ॥ ३ ॥ नासौ धर्मो यत्र नो सत्यमस्ति ॥ ४ ॥ सद्भिरेव सहासीत ॥ ५ ॥ धन्यास्ते पृथिवीपालाः सुखं ये निशि शेरते ॥ ६ ॥ गुणी गुणं वेत्ति न वेत्ति निर्गुणः ॥ ७ ॥ अरक्षितारं राजानं घ्नन्ति दोषाः ॥ ८ ॥ कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ ९ ॥ देशमाख्याति[3] भाषणम् ॥ १० ॥ खण्डितः पण्डितः स्यात् ॥ ११ ॥ गतो ऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः[4] ॥ १२ ॥

कमले कमला शेते हरः शेते हिमालये ।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया[5] ॥ १३ ॥
उद्यन्तु[6] शतमादित्या उद्यन्तु शतमिन्दवः ।
न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः ॥ १४ ॥

1) Rastanak od voljenoga. 2) Upozorenje mladim ženama. 3) ख्या + आ. 4) Suton. 5) Tatpuruṣa prema § 313. 6) इ + उद्. Imp. koji treba prevesti pomoću glagola "moći".

**335.** Uz § 165 – 186.

राज्ञो बिभ्यति लोका राजानः पुनर्वैरिभ्यः ॥ १ ॥ शतं दद्यान्न विवदेत्[1] ॥ २ ॥ न तत्परस्य संदध्यात्प्रतिकूलं[2] यदात्मनः ॥ ३ ॥ अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः ॥ ४ ॥ यत्स्वाधीनं यदपि सुलभं तेन तुष्टिं विधेहि[3] ॥ ५ ॥ नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥ ६ ॥ श्वः कार्यमद्य कुर्वीत ॥ ७ ॥ पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ॥ ८ ॥ न हिंस्यात्सर्वभूतानि ॥ ९ ॥ यदोजसा न लभते क्षत्रियो न तदश्नुते ॥ १० ॥ बलिनो बलिनः स्निह्यन्त्यबलं तु निगृह्णते[4] ॥ ११ ॥ ते धन्या ये न



शृण्वन्ति दीनाः प्रणयिनां गिरः ॥ १२ ॥ स्वकीयान्भुञ्जते मत्स्याः स्वापत्यानि फणाधराः ॥ १३ ॥

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते[5] ॥ १४ ॥
अतिथिर्बालकश्चैव स्त्रीजनो नृपतिस्तथा ।
एते वित्तं न जानन्ति जामाता चैव पञ्चमः ॥ १५ ॥
जानाते यन्न चन्द्रार्कौ जानते यन्न योगिनः ।
जानीते यन्न भर्गो ऽपि तज्जानाति कविः स्वयम् ॥ १६ ॥

1) Korijen वद् + वि. 2) Korijen धा + सम्. 3) Korijen धा + वि (§ 170). 4) Korijen ग्रह् + नि 5) Korijen वृत् + अनु.

**336.** Uz § 233 – 238.

को जानीते कदा कस्य मृत्युकालो भविष्यति ॥ १ ॥ सेनापतौ यशो गन्ता न तु योधान्कथंचन ॥ २ ॥

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति[1] ॥ ३ ॥
यदि न प्रणयेद्राजा[2] दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥ ४ ॥

1) Korijen चर् + प्र. 2) Korijen नी + प्र (§ 301a).

**337.** Uz § 239 – 256.

तृणैर्विधीयते[1] रज्जुर्यया नागो ऽपि बध्यते ॥ १ ॥ स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥ २ ॥ यो यद्वस्तु विजानाति[2] तं तत्र विनियोजयेत्[3] ॥ ३ ॥ भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत्[4] ॥ ४ ॥

लालयेत्पञ्च वर्षाणि दश वर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्[5] ॥ ५ ॥

1) Korijen धा + वि. 2) Kor. ज्ञा + वि 3) Kor. युज् + विनि. 4) Kor. चिन्त् + अनु 5) Otac. Kor. चर् + आ.

**338.** § 267 – 277.

कील आहन्यमानः प्रतिकीलं निर्हन्ति ॥ १ ॥ सन्ति पुत्राः सुबहवो दरिद्राणामनिच्छताम् नास्ति पुत्रः समृद्धानाम् ॥ २ ॥ वार्यमाणस्य वाञ्छा विषयेष्वभिवर्धते ॥ ३ ॥ लोके को ऽभ्युत्थितः पतति को ऽपि पतितो ऽभ्युत्तिष्ठते ॥ ४ ॥ मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ॥ ५ ॥ न सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ६ ॥ यन्न बालैः परिवृतं श्मशानमिव तद्गृहम् ॥ ७ ॥ अप्रतिषिद्धमनुमतम् ॥ ८ ॥ काकाः किमपराध्यन्ति[1] हंसैर्ज-

ग्धेषु शालिषु[2] ॥ ९ ॥ धर्मो हतो हन्ति धर्मो रक्षति रक्षितः ॥ १० ॥ जानन्नपि यः पापं न नियच्छतीशः सन्स तेनैव कर्मणा संप्रयुज्यते[3] ॥ ११ ॥ नष्टं समुद्रे पतितं नष्टं वाक्यमशृण्वति ॥ १२ ॥

1) Kor. राध् + अप. 2) Lok. apsol. 3) युज् + संप्र.

**339.** Uz § 281 – 287.

गते शोको न कर्तव्यः ॥ १ ॥ न हन्तव्यो ब्राह्मणः ॥ २ ॥ यं देवा हिंसितुमिच्छन्ति बुद्ध्या विसेषयन्ति तम् ॥ ३ ॥ बालः पायसदग्धो[1] दध्यपि फूत्कृत्य भक्षयति ॥ ४ ॥

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥ ५ ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ[2] गन्तव्यं वा ततो ऽन्यतः ॥ ६ ॥
श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥ ७ ॥
मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥ ८ ॥

1) Složenica tipa tatp. (§ 313). 2) Kor. धा + पि = अपि.

**340.** Uz § 304 –324.

सुखदुःखे मनुष्याणां चक्रवत्परिवर्तेते ॥ १ ॥ जन्ममृत्यू यात्येको भुनक्त्येकः शुभाशुभम् ॥ २ ॥ अत्वरा सर्वकार्येषु ॥ ३ ॥ दूरस्थो ऽपि समीपस्थो यो वै मनसि वर्तते ॥ ४ ॥ जीविताशा दुस्त्यजा ॥ ५ ॥ आपदर्थं धनं रक्षेत् ॥ ६ ॥ शस्त्रप्रहारा एव वीराणां भूषणम् ॥ ७ ॥ कातरा दीर्घरोगाश्च भिषजां भाग्यहेतवः ॥ ८ ॥ शङ्क्यैव प्रकाशन्ते प्रच्छन्नपातकाः ॥ ९ ॥ जयेदात्मानमेवादौ विजयायान्यविद्विषाम् ॥ १० ॥ विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ॥ ११ ॥ कोशपूर्वाः सर्वारम्भाः ॥ १२ ॥ कुस्त्री प्रफुल्लकमला गूढनक्रेव पद्मिनी ॥ १३ ॥ हृतनयनो विषादी न विषादी भवति जात्यन्धः ॥ १४ ॥ असारः संसारो ऽयं गिरिनदीवेगोपमं यौवनं तृणाग्निसमं जीवितं शरदभ्रच्छायासदृशा भोगाः स्वप्नसदृशो मित्रपुत्रकलत्रसंयोगः ॥ १५ ॥

जरामृत्यू हि भूतानां खादितारौ वृकाविव ।
बलिनां दुर्बलानां च ह्रस्वानां महतामपि ॥ १६ ॥
भार्ये द्वे बहवः पुत्रा दारिद्र्यं रोगसंभवः ।
जीर्णौ च मातापितरावेकैकं नरकाधिकम् ॥ १७ ॥
जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः[1] ॥ १८ ॥

1) Misli se najviši bog, Brahman.



# Uzorci za čitanje

I. Nala *1 – 5*, Mahābhārata 3, 53, 1 i dalje

Priču priča Bṛhadaśva kralju Yudhiṣṭhiri

॥ बृहदश्व उवाच ॥

आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै[1] रूपवानश्वकोविदः ॥ १ ॥
अतिष्ठन्मनुजेन्द्राणां मूर्ध्नि देवपतिर्यथा ।
उपर्युपरि सर्वेषामादित्य इव तेजसा ॥ २ ॥
ब्रह्मण्यो वेदविच्छूरो[2] निषधेषु महीपतिः ।
अक्षप्रियः सत्यवादी महानक्षौहिणीपतिः ॥ ३ ॥
ईप्सितो नरनारीणामुदारः संयतेन्द्रियः ।
रक्षिता धन्विनां श्रेष्ठः साक्षादिव मनुः स्वयम् ॥ ४ ॥
तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ॥ ५ ॥
स प्रजार्थे परं यत्नमकरोत्सुसमाहितः ।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत ॥ ६ ॥
तं स भीमः प्रजाकामस्तोषयामास धर्मवित् ।
महिष्या सह राजेन्द्र सत्कारेण सुवर्चसम् ॥ ७ ॥
तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान्महायशाः ॥ ८ ॥
दमयन्तीं दमं दान्तं दमनं च सुवर्चसम् ।
उपपन्नान्गुणैः सर्वैर्भीमान्भीमपराक्रमान् ॥ ९ ॥
दमयन्ती तु रूपेण तेजसा वपुषा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥ १० ॥
अथ तां वयसि प्राप्ते दासीनां समलंकृतम् ।
शतं शतं सखीनां च पर्युपासच्छचीमिव ॥ ११ ॥
तत्र स्म राजते भैमी सर्वाभरणभूषिता ।
सखीमध्ये ऽनवद्याङ्गी विद्युत्सौदामनी यथा ॥ १२ ॥
न देवेषु न यक्षेषु तादृग्रूपवती क्वचित् ।
मानुषेष्वपि चान्येषु दृष्टपूर्वाथवा श्रुता ॥ १३ ॥
नलश्च नरशार्दूलो लोकेष्वप्रतिमो भुवि ।
कन्दर्प इव रूपेण मूर्तिमानभवत्स्वयम् ॥ १४ ॥
तस्याः समीपे तु नलं प्रशशंसुः कुतूहलात् ।
नैषधस्य समीपे तु दमयन्तीं पुनः पुनः ॥ १५ ॥

1) § 34b. 2) § 28.

तयोरदृष्टकामो ऽभूच्छृण्वतोः सततं गुणान् ।
अन्योन्यं प्रति कौन्तेय स व्यवर्धत हृच्छयः ॥ १६ ॥
अशक्नुवन्नलः कामं तदा धारयितुं हृदा ।
अन्तःपुरसमीपस्थे वन आस्ते रहो गतः ॥ १७ ॥
स ददर्श ततो हंसाञ्जातरूपपरिच्छदान् ।
वने विचरतां तेषामेकं जग्राह पक्षिणम् ॥ १८ ॥
ततो ऽन्तरिक्षगो वाचं व्याजहार नलं तदा ।
हन्तव्यो ऽस्मि न ते राजन्करिष्यामि तव प्रियम् ॥ १९ ॥
दमयन्तीसकाशे त्वां कथयिष्यामि नैषध ।
यथा त्वदन्यं पुरुषं न सा मंस्यति कर्हिचित् ॥ २० ॥
एवमुक्तस्ततो हंसमुत्ससर्ज महीपतिः ।
ते तु हंसाः समुत्पत्य विदर्भानगमंस्ततः ॥ २१ ॥
विदर्भनगरीं गत्वा दमयन्त्यास्तदान्तिके ।
निपेतुस्ते गरुत्मन्तः सा ददर्श च तान्खगान् ॥ २२ ॥
सा तानद्भुतरूपान्वै दृष्ट्वा सखीगणावृता ।
हृष्टा ग्रहीतुं खगमांस्त्वरमाणोपचक्रमे ॥ २३ ॥
अथ हंसा विससृपुः सर्वतः प्रमदावने ।
एकैकशस्तदा कन्यास्तान्हंसान्समुपाद्रवन् ॥ २४ ॥
दमयन्ती तु यं हंसं समुपाधावदन्तिके ।
स मानुषीं गिरं कृत्वा दमयन्तीमथाब्रवीत् ॥ २५ ॥
दमयन्ति नलो नाम निषधेषु महीपतिः ।
अश्विनोः सदृशो रूपे न समास्तस्य मानुषाः ॥ २६ ॥
तस्य वै यदि भार्या त्वं भवेथा वरवर्णिनि ।
सफलं ते भवेज्जन्म रूपं चेदं सुमध्यमे ॥ २७ ॥
वयं हि देवगन्धर्वमनुष्योरगराक्षसान् ।
दृष्टवन्तो न चास्माभिर्दृष्टपूर्वस्तथाविधः ॥ २८ ॥
त्वं चापि रत्नं नारीणां नरेषु च नलो वरः ।
विशिष्टाया विशिष्टेन संगमो गुणवान्भवेत् ॥ २९ ॥
एवमुक्ता तु हंसेन दमयन्ती विशां पते ।
अब्रवीत्तत्र तं हंसं त्वमप्येवं नले वद ॥ 30 ॥
तथेत्युक्त्वाण्डजः कन्यां विदर्भस्य विशां पते ।
पुनरागम्य निषधान्नले सर्वं न्यवेदयत् ॥ ३१ ॥

॥ इति नलोपाख्याने प्रथमो ऽध्यायः ॥ १ ॥

दमयन्ती तु तच्छ्रुत्वा वचो हंसस्य भारत ।
ततः प्रभृति न स्वस्था नलं प्रति बभूव सा ॥ १ ॥
ततश्चिन्तापरा दीना विवर्णवदना कृशा ।



बभूव दमयन्ती तु निःश्वासपरमा तदा ॥ २ ॥
ऊर्ध्वदृष्टिर्ध्यानपरा बभूवोन्मत्तदर्शना ।
पाण्डुवर्णा क्षणेनाथ हृच्छयाविष्टचेतना ॥ ३ ॥
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ।
न नक्तं न दिवा शेते हा हेति रुदती मुहुः ॥ ४ ॥
ततो विदर्भपतये दमयन्त्याः सखीजनः ।
न्यवेदयत्तामस्वस्थां दमयन्तीं नरेश्वर ॥ ५ ॥
तच्छ्रुत्वा नृपतिर्भीमो दमयन्तीसखीगणात् ।
चिन्तयामास तत्कार्यं सुमहत्स्वां सुतां प्रति ॥ ६ ॥
स समीक्ष्य महीपालः स्वां सुतां प्राप्तयौवनाम् ।
अपश्यदात्मना कार्यं दमयन्त्याः स्वयंवरम् ॥ ७ ॥
स संनिमन्त्रयामास महीपालान्विशां पते ।
अनुभूयतामयं वीराः स्वयंवर इति प्रभो ॥ ८ ॥
श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरम् ।
अभिजग्मुस्ततो भीमं राजानो भीमशासनात् ॥ ९ ॥
हस्त्यश्वरथघोषेण नादयन्तो वसुंधराम् ।
विचित्रमाल्याभरणैर्बलैर्दृश्यैः स्वलंकृतैः ॥ १० ॥
तेषां भीमो महाबाहुः पार्थिवानां महात्मनाम् ।
यथार्हमकरोत्पूजां ते ऽवसंस्तत्र पूजिताः ॥ ११ ॥
एतस्मिन्नेव काले तु सुराणामृषिसत्तमौ ।
अटमानौ महात्मानाविन्द्रलोकमितो गतौ ॥ १२ ॥
नारदः पर्वतश्चैव महाप्राज्ञौ महाव्रतौ ।
देवराजस्य भवनं विविशाते सुपूजितौ ॥ १३ ॥
तावर्चयित्वा मघवा ततः कुशलमव्ययम् ।
पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥ १४ ॥

॥ नारद उवाच ॥

आवयोः कुशलं देव सर्वत्रगतमीश्वर ।
लोके च मघवन्कृत्स्ने नृपाः कुशलिनो विभो ॥ १५ ॥

॥ बृहदश्व उवाच ॥

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ।
धर्मज्ञाः पृथिवीपालास्त्यक्तजीवितयोधिनः ॥ १६ ॥
शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।
अयं लोको ऽक्षयस्तेषां यथैव मम कामधुक् ॥ १७ ॥
क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तानहम् ।
आगच्छतो महीपालान्दयितानतिथीन्मम ॥ १८ ॥
एवमुक्तस्तु शक्रेण नारदः प्रत्यभाषत ।

शृणु मे मघवन्येन न दृश्यन्ते महीक्षितः ॥ १९ ॥
विदर्भराज्ञो दुहिता दमयन्तीति विश्रुता ।
रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥ २० ॥
तस्याः स्वयंवरः शक्र भविता नचिरादिव ।
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥ २१ ॥
एतस्मिन्कथ्यमाने तु लोकपालाश्च साग्निकाः ।
आजग्मुर्देवराजस्य समीपममरोत्तमाः ॥ २२ ॥
ततस्ते शुश्रुवुः सर्वे नारदस्य वचो महत् ।
श्रुत्वैव चाब्रुवन्हृष्टा गच्छामो वयमप्युत ॥ २३ ॥
ततः सर्वे महाराज सगणाः सहवाहनाः ।
विदर्भानभिजग्मुस्ते यतः सर्वे महीक्षितः ॥ २४ ॥
नलो ऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमम् ।
अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः ॥ २५ ॥
अथ देवाः पथि नलं ददृशुर्भूतले स्थितम् ।
साक्षादिव स्थितं मूर्त्या मन्मथं रूपसंपदा ॥ २६ ॥
तं दृष्ट्वा लोकपालास्ते भ्राजमानं यथा रविम् ।
तस्थुर्विगतसंकल्पा विस्मिता रूपसंपदा ॥ २७ ॥
ततो ऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।
अब्रुवन्नैषधं राजन्नवतीर्य नभस्तलात् ॥ २८ ॥
भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।
अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥ २९ ॥

॥ इति नलोपाख्याने द्वितीयो ऽध्यायः ॥ २ ॥

तेभ्यः प्रतिज्ञाय नलः करिष्य इति भारत ।
अथैतान्परिपप्रच्छ कृताञ्जलिरुपस्थितः ॥ १ ॥
के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ।
किं च तद्वो मया कार्यं कथयध्वं यथातथम् ॥ २ ॥
एवमुक्ते नैषधेन मघवानभ्यभाषत ।
अमरान्वै निबोधास्मान्दमयन्त्यर्थमागतान् ॥ ३ ॥
अहमिन्द्रो ऽयमग्निश्च तथैवायमपां पतिः[1] ।
शरीरान्तकरो नृणां यमो ऽयमपि पार्थिव ॥ ४ ॥
त्वं वै समागतानस्मान्दमयन्त्यै निवेदय ।
लोकपाला महेन्द्राद्याः समायान्ति दिदृक्षवः ॥ ५ ॥
प्राप्तुमिच्छन्ति देवास्त्वां शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतित्वे वरयस्व ह ॥ ६ ॥

1) = Varuṇa.



एवमुक्तः स शक्रेण नलः प्राञ्जलिरब्रवीत् ।
एकार्थसमुपेतं मां न प्रेषयितुमर्हथ ॥ ७ ॥
कथं नु जातसंकल्पः स्त्रियमुत्सहते पुमान् ।
परार्थमीदृशं वक्तुं तत्क्षमन्तु महेश्वराः ॥ ८ ॥

॥ देवा ऊचुः ॥

करिष्य इति संश्रुत्य पूर्वमस्मासु नैषध ।
न करिष्यसि कस्मात्त्वं व्रज नैषध माचिरम् ॥ ९ ॥

॥ बृहदश्व उवाच ॥

एवमुक्तः स देवैस्तैर्नैषधः पुनरब्रवीत् ।
सुरक्षितानि वेश्मानि प्रवेष्टुं कथमुत्सहे ॥ १० ॥
प्रवेक्ष्यसीति तं शक्रः पुनरेवाभ्यभाषत ।
जगाम स तथेत्युक्त्वा दमयन्त्या निवेशनम् ॥ ११ ॥
ददर्श तत्र वैदर्भीं सखीगणसमावृताम् ।
देदीप्यमानां वपुषा श्रिया च वरवर्णिनीम् ॥ १२ ॥
अतीव सुकुमाराङ्गीं तनुमध्यां सुलोचनाम् ।
आक्षिपन्तीमिव प्रभां शशिनः स्वेन तेजसा ॥ १३ ॥
तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीम् ।
सत्यं चिकीर्षमाणस्तु धारयामास हृच्छयम् ॥ १४ ॥
ततस्ता नैषधं दृष्ट्वा संभ्रान्ताः परमाङ्गनाः ।
आसनेभ्यः समुत्पेतुस्तेजसा तस्य धर्षिताः ॥ १५ ॥
प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः ।
न चैनमभ्यभाषन्त मनोभिस्त्वभ्यपूजयन् ॥ १६ ॥
अहो रूपमहो कान्तिरहो धैर्यं महात्मनः ।
को ऽयं देवो ऽथवा यक्षो गन्धर्वो वा भविष्यति ॥ १७ ॥
न तास्तं शक्नुवन्ति स्म व्याहर्तुमपि किंचन ।
तेजसा धर्षितास्तस्य लज्जावत्यो वराङ्गनाः ॥ १८ ॥
अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी ।
दमयन्ती नलं वीरमभ्यभाषत विस्मिता ॥ १९ ॥
कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन ।
प्राप्तो ऽस्यमरवद्वीर ज्ञातुमिच्छामि ते ऽनघ ॥ २० ॥
कथमागमनं चेह कथं चासि न लक्षितः ।
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
नलं मां विद्धि कल्याणि देवदूतमिहागतम् ॥ २२ ॥
देवास्त्वां प्राप्तुमिच्छन्ति शक्रो ऽग्निर्वरुणो यमः ।
तेषामन्यतमं देवं पतिं वरय शोभने ॥ २३ ॥

तेषामेव प्रभावेन प्रविष्टो ऽहमलक्षितः ।
प्रविशन्तं न मां कश्चिदपश्यन्नाप्यवारयत् ॥ २४ ॥
एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः ।
एतच्छ्रुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि ॥ २५ ॥
॥ इति नलोपाख्याने तृतीयो ऽध्यायः ॥ ३ ॥
सा नमस्कृत्य देवेभ्यः प्रहस्य नलमब्रवीत् ।
प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते ॥ १ ॥
अहं चैव हि यच्चान्यन्ममास्ति वसु किंचन ।
तत्सर्वं तव विश्रब्धं कुरु प्रणयमीश्वर ॥ २ ॥
हंसानां वचनं यत्तु तन्मां दहति पार्थिव ।
त्वत्कृते हि मया वीर राजानः संनिपातिताः ॥ ३ ॥
यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद ।
विषमग्निं जलं रज्जुमास्थास्ये तव कारणात् ॥ ४ ॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह ।
तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि ॥ ५ ॥
येषामहं लोककृतामीश्वराणां महात्मनाम् ।
न पादरजसा तुल्यो मनस्ते तेषु वर्तताम् ॥ ६ ॥
विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमृच्छति ।
त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान् ॥ ७ ॥
विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा ।
भूषणानि च दिव्यानि देवान्प्राप्य तु भुङ्क्ष्व वै ॥ ८ ॥
य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः ।
हुताशमीशं देवानां का तं न वरयेत्पतिम् ॥ ९ ॥
यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः ।
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिम् ॥ १० ॥
धर्मात्मानं महात्मानं दैत्यदानवमर्दनम् ।
महेन्द्रं सर्वदेवानां का तं न वरयेत्पतिम् ॥ ११ ॥
क्रियतामविशङ्केन मनसा यदि मन्यसे ।
वरुणं लोकपालानां सुहृद्वाक्यमिदं शृणु ॥ १२ ॥
नैषधेनैवमुक्ता सा दमयन्ती वचो ऽब्रवीत् ।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा ॥ १३ ॥
देवेभ्यो ऽहं नमस्कृत्य सर्वेभ्यः पृथिवीपते ।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते ॥ १४ ॥
तामुवाच ततो राजा वेपमानां कृताञ्जलिम् ।
दौत्येनागत्य कल्याणि नोत्सहे स्वार्थमीप्सितम् ॥ १५ ॥
कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः ।



परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे ॥ १६ ॥
एष धर्मो यदि स्वार्थो ममापि भविता ततः ।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयताम् ॥ १७ ॥
ततो बाष्पाकुलां वाचं दमयन्ती शुचिस्मिता ।
प्रत्याहरन्ती शनकैर्नलं राजानमब्रवीत् ॥ १८ ॥
उपायो ऽयं मया दृष्टो निरपायो नरेश्वर ।
येन दोषो न भविता तव राजन्कथंचन ॥ १९ ॥
त्वं चैव हि नरश्रेष्ठ देवाश्चेन्द्रपुरोगमाः ।
आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥ २० ॥
ततो ऽहं लोकपालानां संनिधौ त्वां नरेश्वर ।
वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥ २१ ॥
एवमुक्तस्तु वैदर्भ्या नलो राजा विशां पते ।
आजगाम पुनस्तत्र यत्र देवाः समागताः ॥ २२ ॥
तमपश्यंस्तथायान्तं लोकपाला महेश्वराः ।
दृष्ट्वा चैनं ततो ऽपृच्छन्वृत्तान्तं सर्वमेव तम् ॥ २३ ॥
कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता ।
किमब्रवीच्च नः सर्वान्वद भूमिपते ऽनघ ॥ २४ ॥
॥ नल उवाच ॥
भवद्भिरहमादिष्टो दमयन्त्या निवेशनम् ।
प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर्वृतम् ॥ २५ ॥
प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः ।
ऋते तां पार्थिवसुतां भवतामेव तेजसा ॥ २६ ॥
सख्यश्चास्या मया दृष्टास्ताभिश्चाप्युपलक्षितः ।
विस्मिताश्चाभवन्सर्वा दृष्ट्वा मां विबुधेश्वराः ॥ २७ ॥
वर्ण्यमानेषु च मया भवत्सु रुचिरानना ।
मामेव गतसंकल्पा वृणीते सा सुरोत्तमाः ॥ २८ ॥
अब्रवीच्चैव मां बाला आयान्तु सहिताः सुराः ।
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः ॥ २९ ॥
तेषामहं संनिधौ त्वां वरयिष्यामि नैषध ।
एवं तव महाबाहो दोषो न भवितेति ह ॥ ३० ॥
एतावदेव विबुधा यथावृत्तमुदाहृतम् ।
मया शेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः ॥ ३१ ॥
॥ इति नलोपाख्याने चतुर्थो ऽध्यायः ॥ ४ ॥
॥ बृहदश्व उवाच ॥
अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा ।
आजुहाव महीपालान्भीमो राजा स्वयंवरे ॥ १ ॥

तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः ।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः ॥ २ ॥
कनकस्तम्भरुचिरं तोरणेन विराजितम् ।
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम् ॥ ३ ॥
दमयन्ती ततो रङ्गं प्रविवेश शुभानना ।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च ॥ ४ ॥
तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनाम् ।
तत्र तत्रैव सक्ताभून्न चचाल च पश्यताम् ॥ ५ ॥
ततः संकीर्त्यमानेषु राज्ञां नामसु भारत ।
ददर्श भैमी पुरुषान्पञ्च तुल्याकृतीनिह ॥ ६ ॥
तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थितान् ।
संदेहादथ वैदर्भी नाभ्यजानान्नलं नृपम् ॥ ७ ॥
यं यं हि ददृशे तेषां तं तं मेने नलं नृपम् ।
सा चिन्तयन्ती बुद्ध्याथ तर्कयामास भाविनी ॥ ८ ॥
कथं नु देवाञ्जानीयां कथं विद्यां नलं नृपम् ।
एवं संचिन्तयन्ती सा वैदर्भी भृशदुःखिता ॥ ९ ॥
श्रुतानि देवलिङ्गानि तर्कयामास भारत ।
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे ॥ १० ॥
तानीह तिष्ठतां भूमावेकस्यापि न लक्षये ।
एवं विचिन्त्य बहुधा विचार्य च पुनः पुनः ॥ ११ ॥
शरणं प्रति देवानां प्राप्तकालममन्यत ।
देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत् ॥ १२ ॥
हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः ।
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे ॥ १३ ॥
मनसा वचसा चैव यथा नातिचराम्यहम् ।
तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे ॥ १४ ॥
यथा देवैः स मे भर्ता विहितो निषधाधिपः ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ १५ ॥
यथेदं व्रतमारब्धं नलस्याराधने मया ।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे ॥ १६ ॥
स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः ।
यथाहमभिजानीयां पुण्यश्लोकं नराधिपम् ॥ १७ ॥
निशम्य दमयन्त्यास्तत्करुणं परिदेवितम् ।
यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे ॥ १८ ॥
सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् ।
हृषितस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिम् ॥ १९ ॥



छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः ।
भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः ॥ २० ॥
सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत ।
नैषधं वरयामास भैमी धर्मेण पाण्डव ॥ २१ ॥
विलज्जमाना वस्त्रान्ते जग्राहायतलोचना ।
स्कन्धदेशेऽसृजत्तस्य स्रजं परमशोभनाम् ॥ २२ ॥
वरयामास चैवैनं पतित्वे वरवर्णिनी ।
ततो हाहेति सहसा मुक्तः शब्दो नराधिपैः ॥ २३ ॥
देवैर्महर्षिभिस्तत्र साधु साध्विति भारत ।
विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपम् ॥ २४ ॥
दमयन्तीं तु कौरव्य वीरसेनसुतो नृपः ।
आश्वासयद्वरारोहां प्रहृष्टेनान्तरात्मना ॥ २५ ॥
यत्त्वं भजसि कल्याणि पुमांसं देवसंनिधौ ।
तस्मान्मां विद्धि भर्तारमेवं ते वचने रतम् ॥ २६ ॥
यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते ।
तावत्त्वयि भविष्यामि सत्यमेतद्ब्रवीमि ते ॥ २७ ॥
पार्थिवाश्चानुभूयास्य विवाहं विस्मयान्विताः ।
दमयन्त्याश्च मुदिताः प्रतिजग्मुर्यथागतम् ॥ २८ ॥
गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः ।
विवाहं कारयामास दमयन्त्या नलस्य च ॥ २९ ॥
॥ इति नलोपाख्याने पञ्चमो ऽध्यायः ॥ ५ ॥

## II. Lukava trgovčeva žena (Hitopadeśa 4, 3)

उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥

अस्ति विक्रमपुरे समुद्रदत्तो नाम वणिक् । तस्य च रत्नप्रभा नाम वधूः केनापि स्वसेवकेन समं सर्वदा रमते । यतः ।

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥

अथैकदा सा रत्नप्रभा तस्य सेवकस्य मुखे चुम्बनं ददती तेन समुद्रदत्तेनालोकिता । ततः सा बन्धकी सत्वरं भर्तुः समीपमुपगम्याह । नाथ । एतस्य सेवकस्य तावन्महती निर्वृत्तिः । यतो हिङ्गुगन्धः प्रत्यक्षो ऽस्य मुखे मया घ्रातः । तथा चोक्तम् ।

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥

तच्छ्रुत्वा सेवकेनापि प्रकुप्योक्तम् । यस्य गृहस्येदृशी विधा तत्र सेवकेन कथं स्थातव्यम् । यत्र प्रतिक्षणं वधूः सेवकस्य मुखमाघ्राति । ततोऽसावुत्थाय चलितः । स च साधुना प्रबोध्य यत्नाद्धृतः ॥

## III. Brahman i lonac za brašno (Pañcatantra 5, 9)

अनागतवतीं चिन्तामसंभाव्यां करोति यः ।
स एव पाण्डुरः शेते सोमशर्मपिता यथा ॥

कस्मिंश्चिन्नगरे कश्चित्स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तस्य भिक्षार्जितैः सक्तुभिर्भुक्तोर्वरितैर्घटः परिपूरितः । तं च घटं नागदन्तेऽवलम्ब्य तस्याधस्तात्खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति । अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास । यत्परिपूर्णोऽयं घटस्तावत्सक्तुभिर्वर्तते । तद्यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते । ततस्तेन मयाजाद्वयं ग्रहीतव्यम् । ततः षण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति । ततोऽजाभिः प्रभूता गा ग्रहीष्यामि गोभिर्महिषीर्महिषीभिर्वडवाः । वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति । तेषां विक्रयात्प्रभूतं सुवर्णं भविष्यति । सुवर्णेन चतुःशालं गृहं संपद्यते । ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवयस्कां रूपाढ्यां कन्यां दास्यति । तत्सकाशात्पुत्रो मे भविष्यति । तस्याहं सोमशर्मेति नाम करिष्यामि । ततस्तस्मिञ्जानुचलनयोग्ये संजातेऽहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेशे उपविष्टस्तदवधारयिष्यामि । अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरोऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति । ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्यामि । गृहाण तावद्बालकम् । सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति । ततोऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि । एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः । सक्तुभिः पाण्डुरतां गतः ॥

## IV. Lažni i pravi prijatelj (Pañcatantra 1, 22)

पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः ।
वानरेण हतो राजा विप्राश्चौरेण रक्षिताः ॥

कस्यचिद्राज्ञो नित्यं वानरोऽतिभक्तिपरोऽङ्गसेवकोऽन्तःपुरेऽप्यप्रतिषिद्धप्रसरोऽतिविश्वासस्थानमभूत् । एकदा राज्ञो निद्रां गतस्य वानरे व्यजनं नीत्वा वायुं विदधति राज्ञो वक्षःस्थलोपरि मक्षिकोपविष्टा । व्यजनेन मुहुर्मुहुर्निषिध्यमानापि पुनः पुनस्तत्रैवोपविशति । ततस्तेन स्वभावचपलेन मूर्खेण वानरेण क्रुद्धेन सता तीव्रं खड्गमादाय तस्या उपरि प्रहारो विहितः । ततो मक्षिकोड्डीय गता परं तेन शितधारेणासिना राज्ञो वक्षो द्विधा जातं राजा मृतश्च । तस्माच्चिरायुरिच्छता नृपेण मूर्खोऽनुचरो न रक्षणीयः ॥



अपरमेकस्मिन्नगरे कोऽपि विप्रो महाविद्वान्परं पूर्वजन्मयोगेन चौरो वर्तते । तस्मिन्पुरेऽन्यदेशादागतांश्चतुरो विप्रान्बहूनि वस्तूनि विक्रीणतो दृष्ट्वा चिन्तितवान् । अहो केनोपायेनैषां धनं लभे । इति विचिन्त्य तेषां पुरोऽनेकानि शास्त्रोक्तानि सुभाषितानि चातिप्रियाणि मधुराणि वचनानि जल्पता तेषां मनसि विश्वासमुत्पाद्य सेवा कर्तुमारब्धा । अथवा साध्विदमुच्यते ।

असती भवति सलज्जा क्षारं नीरं च शीतलं भवति ।
दम्भी भवति विवेकी प्रियवक्ता भवति धूर्तजनः ॥

अथ तस्मिन्सेवां कुर्वति तैर्विप्रैः सर्ववस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्रीतानि । ततस्तानि जङ्घामध्ये तत्समक्षं प्रक्षिप्य स्वदेशं प्रतिगन्तुमुद्यमो विहितः । ततः स धूर्तविप्रस्तान्विप्रान्गन्तुमुद्यतान्प्रेक्ष्य चिन्ताव्याकुलितमनाः संजातः । अहो धनमेतन्न किंचिन्मम चटितम् । अथैभिः सह यामि । पथि क्वापि विषं दत्त्वैतान्निहत्य सर्वरत्नानि गृह्णामि । इति विचिन्त्य तेषामग्रे सकरुणं विलप्येदमाह । भो मित्राणि यूयं मामेकाकिनं मुक्त्वा गन्तुमुद्यताः । तन्मे मनो भवद्भिः सह स्नेहपाशेन बद्धं भवद्विरहनाम्नैवाकुलं संजातं यथा धृतिं क्वापि न धत्ते । ततो यूयमनुग्रहं विधाय सहायभूतं मामपि सहैव नयत । तद्वचः श्रुत्वा ते करुणार्द्रचित्तास्तेन सममेव स्वदेशं प्रति प्रस्थिताः । अथाध्वनि तेषां पञ्चानामपि पल्लीपुरमध्ये व्रजतां ध्वाङ्क्षाः कथयितुमारब्धाः । रे रे किराता धावत धावत । सपादलक्षधनिनो यान्ति । एतान्निहत्य धनं नयत । ततः किरातैर्ध्वाङ्क्षवचनमाकर्ण्य सत्वरं गत्वा ते विप्रा लगुडप्रहारैर्जर्जरीकृत्य वस्त्राणि मोचयित्वा विलोकिताः परं धनं किंचिन्न लब्धम् । तदा तैः किरातैरभिहितम् । भोः पान्थाः पुरा कदापि ध्वाङ्क्षवचनमनृतं नासीत् । ततो भवतां संनिधौ क्वापि धनं विद्यते तदर्पयत । अन्यथा सर्वेषामपि वधं विधाय चर्म विदार्य प्रत्यङ्गं प्रेक्ष्य धनं नेष्यामः । तदा तेषामीदृशं वचनमाकर्ण्य चौरविप्रेण मनसि चिन्तितम् । यदैषां विप्राणां वधं विधायाङ्गं विलोक्य रत्नानि नेष्यन्ति तदापि मां वधिष्यन्ति ततोऽहं पूर्वमेवात्मानमरत्नं समर्प्यैतान्मुञ्चामि । उक्तं च ।

मृत्योर्बिभेषि किं बाल न स भीतं विमुञ्चति ।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥

तथा च ।

गवार्थे ब्राह्मणार्थे च प्राणत्यागं करोति यः ।
सूर्यस्य मण्डलं भित्त्वा स याति परमां गतिम् ॥

इति निश्चित्याभिहितम् । भोः किराता यद्येवं ततो मां पूर्वं निहत्य विलोकयत । ततस्तैस्तथानुष्ठिते तं धनरहितमवलोक्यापरे चत्वारोऽपि मुक्ताः ॥

## V. Osveta životinja (Pañcatantra 1, 15)

चटकाकाष्ठकूटेन[1] मक्षिकादर्दुरैस्तथा ।
महाजनविरोधेन कुञ्जरः प्रलयं गतः ॥

कस्मिंश्चिद्वनोद्देशे चटकदंपती तमालतरुकृतनिलयौ प्रतिवसतः । अथ गच्छता कालेन संततिरभवत् । अन्यस्मिन्नहनि प्रमत्तो गजः कश्चित्तं तमालवृक्षं घर्मार्तश्छायार्थी समाश्रितः । ततो मदोत्कर्षात्तां तस्य शाखां चटकाक्रान्तां पुष्कराग्रेणाकृष्य बभञ्ज । तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि । आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता । अथ साण्डभङ्गाभिभूता प्रलापान्कुर्वाणा न कथंचिद्तिष्ठत् । अत्रान्तरे तस्यास्तान्प्रलापाञ्श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत्तद्दुःखदुःखितो ऽभ्येत्य तामुवाच । भवति किं वृथा प्रलापेन । उक्तं च ।

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानां च मूर्खाणां विशेषो ऽयं यतः स्मृतः ॥

तथा च ।

अशोच्यानीह भूतानि यो मूढस्तानि शोचति ।
स दुःखे लभते दुःखं द्वावनर्थौ निषेवते ॥

अन्यच्च ।

श्लेष्माश्रु[1] बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतो ऽवशः ।
तस्मान्न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥

चटका प्राह । अस्त्वेतत् । परं दुष्टगजेन मदान्मम संतानक्षयः कृतः । तद्यदि मम त्वं सुहृत्सत्यस्तदस्य गजापसदस्य को ऽपि वधोपायश्चिन्त्यो यस्यानुष्ठानेन मे संततिनाशदुःखमपसरति ।

काष्ठकूट आह । भवति सत्यमभिहितं भवत्या । उक्तं च ।

स सुहृद्व्यसने यः स्यात्स पुत्रो यस्तु भक्तिमान् ।
स भृत्यो यो विधेयज्ञः सा भार्या यत्र निर्वृतिः ॥

तत्पश्य मे बुद्धिप्रभावम् । परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति । तत्तामाहूयागच्छामि येन स दुरात्मा दुष्टगजो हन्यते । अथासौ सह चटकया मक्षिकामासाद्य प्रोवाच । भद्रे ममेष्टेयं चटका केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन । तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि । मक्षिकाप्याह । भद्र किमुच्यते ऽत्र विषये । उक्तं च ।

पुनःप्रत्युपकाराय मित्राणां क्रियते प्रियम् ।
यत्पुनर्मित्रमित्रस्य कार्यं मित्रैर्न किं कृतम् ॥

सत्यमेतत् । परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति । तमप्याहूय यथोचितं कुर्मः । उक्तं च ।

1) Dvandva § 309. 2



हितैः साधुसमाचारैः[1] शास्त्रज्ञैर्मतिशालिभिः ।
कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः ॥

अथ ते त्रयो ऽपि गत्वा मेघनादस्याग्रे पूर्वं वृत्तान्तं निवेद्य तस्थुः । अथ स प्रोवाच । कियन्मात्रो गजो वराको महाजनस्य कुपितस्य । तन्मदीयो मन्त्रः कर्तव्यः । मक्षिके त्वं गत्वा मध्याह्नसमये तस्य मदोत्कटस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु येन श्रवणसुखलालसो निमीलितनयनो भवति । ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनो ऽन्धीभूतस्तृषार्तो मम गर्ततटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वाभ्येति । ततो गर्तमासाद्य पतिष्यति पञ्चत्वं यास्यति चेति । एवं समवायः कर्तव्यो यथा वैरसाधनं भवति । अथ तथानुष्ठिते स मत्तगजो मक्षिकागेयश्रवणसुखान्निमीलितनयनः पश्चात्काष्ठकूटहृतचक्षुर्मध्याह्नसमये भ्राम्यन्मण्डूकशब्दानुसारी गच्छन्महतीं गर्तामासाद्य पतितो मृतश्च ॥

## VI. Miš kao djevojka (Tantrākhyāyika 3, 9)[2]

सूर्यं भर्तारमिच्छन्ती पर्जन्यं मारुतं गिरिम् ।
स्वयोनिं मूषिका प्राप्ता योनिर्हि दुरतिक्रमा ॥

कस्मिंश्चिद्देशे कश्चिदृषिर्जाह्नव्यां स्नात्वोपस्प्रष्टुमारब्धः । करतले चास्य श्येनपरिभ्रष्टा मूषकशाविका पतिता । तां चासौ न्यग्रोधपादपमूले संस्थाप्य पुनस्स्नात्वा गृहाभिमुख× प्रायात् । मूषिकां च स्मृत्वाचिन्तयत् । नृशंसमेतन्मया कृतं मातृपितृपरिभ्रष्टां मूषिकां परित्यजतेति । एवमाकलय्य प्रतिनिवृत्य तां मूषिकां स्वतपोबलेन कन्यां कृत्वा गृहमानीयानपत्यायै भार्यायै प्रायच्छत् । आह च । भद्रे प्रयत्नेनेयं संवर्ध्यतामिति । अथ कालेन द्वादशवर्षे प्राप्ते विवाहकार्ये तस्या ऋषिश्चिन्तामापेदे । यतः ।

पितुर्गृहे तु या कन्या रज× पश्यति चक्षुषा ।
वृषली सा तु विज्ञेया न शूद्री वृषली स्मृता ॥

अतो ऽहमेनां सदृशाय प्रयच्छामि । उक्तं च ।

ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोस्सख्यं विवाहश्च न तु पुष्टविपुष्टयोः ॥

स एवं मत्वा भगवन्तं सहस्रकिरणमाहूयाभिहितवान् । विवाह्यतां मम दुहितेयमिति । असावपि लोकपालस्सर्ववृत्तान्तप्रत्यक्षदर्शी तमाह । भगवन् । मत्तो मेघा बलवत्तराः । यत्कारणमहमुदितो ऽपि तैरदृश्य× क्रिय इति । एवमेतदित्युक्त्वा मुनिर्मेघानाहूतवान् । गृह्यतां मे दुहितेति । ते ऽप्याहुः । अस्मत्तो ऽपि [3]बलवान्वायुः । तेन वयमितश्चेतश्च दिग्भ्यो विक्षिप्यामहे । अथ तेन वायुराहूतः । गृह्यतां मद्दुहितेति । एवमुक्तो ऽसावब्रवीत् । भगवन् ।

1) Bah. 2) Usp. § 33a) Nap. 3) Pozitiv sa znač. komp.

मत्तो बलवत्तरा× पर्वताः । यतो ऽहं तानङ्गुलमात्रमपि चालयितुमशक्तः । ततो ऽसावचलमाहूयाभिहितवान् । गृह्यतां मम कन्येति । स आह । नूनमचला[1] वयं किं त्वजस्रं मूषकैर्गम्याः । तैरितश्चेतश्च शतच्छिद्रा× क्रियामहे । एवमवधार्य मुनिना मूषक आहूयोक्तः । गृह्यतां मम कन्येति । ततो ऽसावाह । विधुरमिदम् । कथमियं विवरं प्रवेक्ष्यतीति । सत्यमेतदिति परमर्षिणा स्वतपोबलेन पुन× पूर्वप्रकृतिमापादिता ॥

## VII. Tkalac kao Viṣṇu (Pañcatantra 1, 5)[2]

सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति ।
कौलिको विष्णुरूपेण राजकन्यां निषेवते ॥

कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ मित्रे प्रतिवसतः स्म । तत्र च बाल्यात्प्रभृति सहचारिणौ परस्परमतीव स्नेहपरौ सदैकस्थाने विहारिणौ कालं नयतः । कदाचिदथ तत्राधिष्ठाने कस्मिंश्चिद्देवतायतने महोत्सवो यात्रालक्षणः संवृत्तः । तत्र च नटनर्तकचारणसंकुले नानादेशादागतजनाकुले तौ सहचरौ भ्रमन्तौ कांचिद्राजकन्यां करेणुकारूढां सर्वलक्षणसनाथां कञ्चुकिवर्षधरपरिवृतां देवतादर्शनार्थं समायातां दृष्टवन्तौ । अथासौ कौलिकस्तां दृष्ट्वा विषार्दित इव दुष्टग्रहगृहीत इव कामशरैर्हन्यमानः सहसा भूतले पपात । अथ तं तदवस्थमवलोक्य रथकारस्तद्दुःखदुःखित आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानयत् । तत्र विविधैः शीतोपचारैश्चिकित्सकोपदिष्टैर्मन्त्रवादिभिश्चोपचर्यमाणश्चिरात्कथंचित्सचेतनो बभूव । ततश्च रथकारेण पृष्टः । भो मित्र किमेवं त्वमकस्माद्विचेतनः संजातः । तत्कथ्यतामात्मस्वरूपम् । सो ऽब्रवीत् । वयस्य यद्येवम् तच्छृणु मे रहस्यं येनाशेषं ते वदामि । यदि त्वं सौहार्दं मन्यसे तदा काष्ठप्रदानेन प्रसादः क्रियताम् । क्षम्यतां यन्मया प्रणयातिरेकादयुक्तं तवानुष्ठितम् । सो ऽपि तदाकर्ण्य बाष्पपिहितनयनः सगद्गदमुवाच । वयस्य यद्येवम् तद्दुःखकारणं कथय येन तस्य प्रतीकारः क्रियते यदि कर्तुं शक्यते । उक्तं च यतः ।

औषधार्थसुमन्त्राणां बुद्धेश्चैव महात्मनाम् ।
असाध्यं नास्ति लोके ऽत्र किंचिद्ब्रह्माण्डमध्यगम् ॥

तदेतेषां चतुर्णां यदि साध्यं भविष्यति तदहं साधयिष्यामि । कौलिक आह । वयस्य यद्येवम् एतेषामन्येषामपि शतसहस्रोपायानामसाध्यं तन्मे दुःखम् । तस्मान्मम मरणे कालक्षेपं मा कुरु । रथकार आह । भो मित्र । तथापि निवेदय मे येनासाध्यं मत्वा त्वया सह वह्नौ प्रविशामि । न क्षणमपि त्वद्वियोगं सहिष्ये । एष मे निश्चयः । कौलिक आह । वयस्य श्रूयतां तर्हि ।

1) Igra riječi. 2) Izostanak sandhija ima u nekim slučajevima značenje zareza.



या राजकन्या तत्रोत्सवे करेणुकारूढा समायाता दृष्टा तस्या दर्शनानन्तरं भगवता मकरध्वजेनेयमवस्था विहिता । न शक्नोमि तद्वेदनां सोढुम् । रथकारो ऽपि तच्छ्रुत्वा सस्मितमिदमाह । वयस्य यद्येवम् तद्दिष्ट्या सिद्धं त्वत्प्रयोजनम् । तदद्यैव तया सह संगमः क्रियतामिति । कौलिक आह । वयस्य यत्र कन्यकान्तःपुरे वायुं मुक्त्वा नान्यस्य प्रवेशो ऽस्ति तत्र रक्षापुरुषरक्षिते कथं तया सह संगमः क्रियताम् । तत्किं मामेवासत्यवचनैर्विडम्बयसि । रथकार आह । वयस्य पश्य मे बुद्धिबलम् । एवमभिधाय तत्क्षणात्कीलासंचारिणं वैनतेयं बाहुयुगलं च वायुजवृक्षदारुणा शङ्खचक्रगदापद्मान्वितं वनमालान्वितं सकिरीटकौस्तुभमघटयत् । ततश्च तस्मिंस्तं समारोप्य विष्णुचिह्नैश्चिह्नितं कृत्वा कीलासंचारणविज्ञानं दर्शयित्वा प्रोवाच । भो वयस्य अनेन रूपेण त्वं कन्यकान्तःपुरे निशीथे तां राजकन्यां सप्तभूमिकप्रासादप्रान्तगतां मुग्धस्वभावां त्वां वासुदेवं मन्यमानां स्वकीयमिथ्यावक्रोक्तिभी रञ्जयित्वा भज ।

कौलिको ऽपि तदाकर्ण्य तथारूपस्तत्र गत्वा तामाह । राजपुत्रि सुप्ता किं वा जागर्षि । अहं ते क्षीरसमुद्रात्सानुरागो लक्ष्मीं विहाय स्वयमेवाभ्यागतः । तन्मया सह क्रियतां समागम इति । सापि तं गरुडारूढं चतुर्भुजं सर्वायुधसमेतमवलोक्य सविस्मयमासनादुत्थाय कृताञ्जलिपुटा प्रोवाच । भगवन् अहं मानुषकीटिकाशुचिः । भगवांस्त्रैलोक्यपूज्यः कर्ता च । तत्कथमेतत्कर्तुं युज्यते । कौलिक आह । सुभगे सत्यमभिहितम् । परं किं तु राधा नाम मे भार्या नन्दगोपकुल आसीत् । सा त्वं मत्परिणीता । तेनाहमागत इति । सा प्रोवाच । भगवन् यद्येवम् तन्मे तातं प्रार्थय येन सो ऽप्यविकल्पं तुभ्यं मां प्रयच्छति । कौलिक आह । सुभगे नाहं मानुषदर्शनं गच्छामि कुतो वाक्यालापकरणम् । तद्गान्धर्वविवाहेनात्मानं प्रयच्छ । नो चेत् शापं दत्त्वा त्वां सान्वयां भस्मसात्करिष्यामीति ।

एवमभिधाय गरुडादवतीर्य सव्ये पाणौ गृहीत्वा तां सलज्जां सभयां वेपमानां शय्यामनयत् । ततश्च रात्रिशेषं यावद्वात्स्यायनोक्तविधिना निषेव्य प्रत्यूषे स्वगृहमलक्षितो जगाम । एवं तस्य तां नित्यमेव सेवमानस्य कालो गच्छति ।

अथ कदाचित्कञ्चुकिनस्तस्या अधरप्रवालमलीकेनाधरखण्डितेन खण्डितं दृष्ट्वा ते प्रोचुः । अहो एतस्या राजकन्यायाः पुरुषोपभुक्ताया इव शरीरावयवा विभाव्यन्ते । तत्किमिदम् । सुरक्षिते ऽप्यस्मिन्गृह एवंविधो व्यवहारः । तद्राज्ञे निवेदयाम इति । एवं निश्चित्य राजानं समभ्येत्य प्रोचुः । देव वयं न विद्मः परं सुरक्षिते ऽप्यस्मिन्कन्यकान्तःपुरे कश्चित्प्रविशति । तत्र देवः प्रमाणमिति ।

राजापि तच्छ्रुत्वातीव व्याकुलितचित्तो देवीपार्श्वं गत्वा प्रोवाच । देवि विज्ञायतां सम्यगेते कञ्चुकिनो यद्वदन्ति । तस्याद्य कृतान्तः कुपितो येनैष द्रोहः कृतः । देवी श्रुत्वा व्याकुलीभूता सत्वरं गत्वा तां खण्डिताधरां नख-

विदारितशरीरामपश्यत्। प्रोवाच च। आः पापे कुलनाशिनि। किमेवं शीलखण्डनं कृतम्। को ऽयं कृतान्तावलोकितस्त्वत्सकाशमभ्येति। तत्कथ्यतां ममाग्रे सत्यमिति। सापि त्रपाधोमुख्यूचे सकलं विष्णुरूपकौलिकवृत्तान्तम्। तच्छ्रुत्वा प्रहसितवदना पुलकाङ्कितसर्वाङ्गी सत्वरं गत्वा राजानमूचे। देव दिष्ट्या वर्धसे। नित्यमेव निशीथे भगवान्नारायणः कन्यकापार्श्वे समभ्येति। तेन गान्धर्वविवाहेन विवाहिता सा। तदद्य रात्रौ मया त्वया च वातायनगताभ्यां स निशीथे द्रष्टव्यो यतो न स मानुषैः सह वचनं करोति।

तच्छ्रुत्वा राज्ञो हर्षितस्य तद्दिनं वर्षशतमिव कथंचिज्जगाम। ततस्तु रात्रौ निभृतो भूत्वा वातायनस्थो गगनासक्तदृष्टिर्यावत्तिष्ठति तावत्तस्मिन्समये गरुडारूढं शङ्खचक्रगदाहस्तं यथोक्तचिह्नमाकाशादवोत्तरन्तं कौलिकमपश्यत्। ततश्च सुधापूरप्लावितमिवात्मानं मन्यमानस्तामुवाच। प्रिये नास्त्यन्यो धन्यतरो मया त्वया च समानो यदस्मत्प्रसूतिं भगवान्नारायणः समभ्येत्य भजते। तत्सिद्धा अस्माकं सर्वे मनोरथा हृदयस्थाः। अथ जामातृप्रभावेण सकलां वसुमतीं वशीकरिष्यामीति।

एवं निश्चित्य सर्वैः सीमाधिपैः सह मर्यादाव्यतिक्रममकरोत्। ते च तं मर्यादाव्यतिक्रमेण वर्तमानमवलोक्य सर्वे समभ्येत्य तेन सह विग्रहं चक्रुः। एतस्मिन्नन्तरे राजा देवीमुखेन तां दुहितरमुवाच। पुत्रि त्वयि दुहितरि स्थितायां भगवति नारायणे जामातरि स्थिते किमेवं युज्यते यत्सर्वे ऽपि पार्थिवा मया सह विग्रहं कुर्वन्ति। तत्संबोध्यो ऽद्य त्वया भर्ता यथा मम शत्रून्व्यापादयति तत्कार्यम्।

अथ कौलिको रात्रौ समायातः सविनयं राजपुत्र्याभिहितः। भगवन् त्वयि जामातरि स्थिते यच्छत्रुभिः परिभूयते तातस्तत्ते पराभवः। तत्प्रसादं कृत्वा सर्वांस्ताञ्शत्रून्व्यापादय। कौलिक आह। सुभगे कियन्मात्रास्तावत्तव शत्रवः। तद्विश्रब्धा भव। क्षणेन सुदर्शनचक्रेण तिलशः खण्डयिष्यामि।

अथ गच्छता कालेन सर्वदेशं शत्रुभिरुद्वास्य स राजा प्राकारशेषः कृतः। तदपि तं वासुदेवरूपधरं कौलिकमजानन्नित्यमेव विशेषतः कर्पूरकस्तूरिकादिपरिमलविशेषान्नानाप्रकारवस्त्रपुष्पभक्ष्यपेयान्[1] प्रेषयन्दुहितृमुखेन तमूचे। भगवन् प्रभाते स्थानभङ्गो नूनं भविष्यति। यतः सर्वेषां यवसान्नसंचयः संजातः। अपरं सर्वो ऽपि जनो जर्जरितदेहः संवृत्तो योद्धुमक्षमः प्रचुरो मृतश्च। तदेवं ज्ञात्वात्र काले यदुचितं भवति तत्कर्तव्यम्। तच्छ्रुत्वा कौलिको व्यचिन्तयत्। स्थानभङ्गे संजाते ममापि नूनं मृत्युरनया सह वियोगश्च भविष्यति। तस्माद्गरुडमारुह्याकाशस्थः सायुधमात्मानं शत्रूणां दर्शयामि। कदाचिद्विष्णुमूर्तिं मन्यमानास्ते साशङ्का अस्य राज्ञो योधैर्हन्यन्ते। उक्तं च यतः।

1) Bahuvrīhi, atribut uz °विशेषान्. Ili da se popravi u °पेयानि?



निर्विषेणापि सर्पेण कर्तव्या महती फटा।
विषं भवतु मा वास्तु फटाटोपो भयंकरः॥

अथवा मम स्थानार्थे मृत्युर्भवति तदपि सुन्दरतरम्। उक्तं च यतः।

गवार्थे ब्राह्मणार्थे च स्थानार्थे स्त्रीकृते ऽथवा।
स्वाम्यर्थे यस्त्यजेत्प्राणांस्तस्य लोकाः सनातनाः॥

एवं निश्चित्य दन्तधावनं भक्षयित्वा प्रोवाच। सुभगे समस्तैः शत्रुभिर्व्यापादितैरन्नं भक्षयिष्यामि त्वया सह संगमं च करिष्यामीति। परं वाच्यस्त्वयात्मपिता यत्प्रभाते प्रभूतेन सैन्येन नगरान्निष्क्रम्य योद्धव्यम्। अहं चाकाशस्थित एव सर्वांस्तान्निस्तेजसः करिष्यामि। पश्चात्सुखेन भवता हन्तव्याः। यदि पुनरहं स्वयमेव सूदयिष्यामि तत्तेषां पापात्मनां वैकुण्ठगतिर्भविष्यति। तस्मात्ते तथा कर्तव्या यथा पलायमानास्ते न खे गच्छन्ति। सापि तदाकर्ण्य स्वयं गत्वा सर्वं पितुरुवाच। राजापि तस्या वचनं श्रुत्वा प्रत्यूषे युद्धाय निश्चक्राम। कौलिको ऽपि मरणे कृतनिश्चयश्चापपाणिराकाशस्थित एव युद्धाय प्रस्थितः।

एतस्मिन्नन्तरे भगवता नारायणेनातीतानागतवर्तमानवेदिना स्मृतमात्रो वैनतेयः प्राप्तः। वासुदेवश्च कौलिकरूपं विज्ञाय वैनतेयमुवाच। भो गरुत्मन् जानासि त्वम्। मम रूपेण कौलिको दारुमये त्वयि समारूढो राजकन्यकामुपभुङ्क्ते। सो ऽब्रवीत्। देव ज्ञातं सर्वमस्य विचेष्टितम्। किं कर्तव्यं सांप्रतम्। भगवानाह। कौलिको ऽद्य मरणे कृतनिश्चयो ऽनशने कृतनिश्चयश्च युद्धार्थं निर्गतस्तिष्ठति। स नूनं नानाक्षत्रियप्रधानैः शराहतो निधनं यास्यति। तस्मिन्मृते सर्वो ऽपि जन एवं वदिष्यति यत्प्रभूतक्षत्रियैर्मिलित्वा वासुदेवो गरुडश्च निपातितः। ततः परं लोको ऽयमावयोः पूजां न करिष्यति। शत्रूंस्तद्द्रुतं गत्वा तत्र दारुमये गरुडे संक्रमणं कुरु। अहं कौलिकशरीरे संक्रमणं करिष्यामि येन स शत्रून्व्यापादयति। शत्रुवधादावयोर्माहात्म्यवृद्धिश्च भवति।

अथ गरुडेन तथेति प्रतिपन्ने भगवान्नारायणस्तस्य शरीरे संक्रमणमकरोत्। एतस्मिन्नन्तरे सर्वे ते क्षत्रिया विष्णुवैनतेयतेजसा दग्धास्तेन भूभुजा व्यापादिताः। ततः परं स कौलिकः प्रत्यक्षतया स्वेच्छया तां राजपुत्रीं बुभुजे॥

## VII. Vjerni trgovčev sin (Kathāsaritsāgara 28, 113 i dalje)

नगर्यां पुष्करावत्यां गूढसेनाभिधो नृपः।
आसीत्तस्य च जातो ऽभूदेक एव किलात्मजः॥ १ ॥
स राजपुत्रो दृप्तः सन्नेकपुत्रतया शुभम्।
अशुभं वापि यच्चक्रे पिता तस्यासहिष्ट तत्॥ २ ॥
भ्राम्यतोपवने जातु दृष्टस्तेनैकपुत्रकः।
वणिजो ब्रह्मदत्तस्य स्वतुल्यविभवाकृतिः॥ ३ ॥
दृष्ट्वा च सद्यः सो ऽनेन स्वयंवरसुहृत्कृतः।

तदैव चैकरूपौ तौ जातौ राजवणिक्सुतौ ॥ ४ ॥
स्थातुं न शेकतुः चिरं तावन्योन्यमदर्शने ।
आशु बध्नाति हि प्रेम प्राग्जन्मान्तरसंस्तवः ॥ ५ ॥
नोपभुङ्क्ते स्म तं भोगं राजपुत्रः कदाचन ।
वणिक्पुत्रस्य यस्तस्य नादावेवोपकल्पितः ॥ ६ ॥
एकदा सुहृदस्तस्य निश्चित्योद्वाहमादितः ।
अहिच्छत्रं विवाहाय स प्रतस्थे नृपात्मजः ॥ ७ ॥
मित्रेण तेन साकं च गजारूढः ससैनिकः ।
गच्छन्निक्षुमतीतीरं प्राप्य सायं समावसत् ॥ ८ ॥
तत्र चन्द्रोदये पानमासेव्य शयनं श्रितः ।
अर्थितो निजया धात्र्या कथां वक्तुं प्रचक्रमे ॥ ९ ॥
उपक्रान्तकथो जह्रे श्रान्तो मत्तश्च निद्रया ।
धात्री च तद्वत्सो ऽप्यासीत्स्नेहाज्जाग्रद्वणिक्सुतः ॥ १० ॥
ततः सुप्तेषु चान्येषु स्त्रीणामिव मिथः कथा ।
गगने सुश्रुवे तेन वणिक्पुत्रेण जाग्रता ॥ ११ ॥
अनाख्याय कथां सुप्तः पापो ऽयं तच्छपाम्यहम् ।
परिद्रक्ष्यत्यसौ हारं प्रातस्तं चेद्ग्रहीष्यति ॥ १२ ॥
कण्ठलग्नेन तेनैष तत्क्षणं मृत्युमाप्स्यति ।
इत्युक्त्वा विररामैका द्वितीया च ततो ऽब्रवीत् ॥ १३ ॥
अतो यद्ययमुत्तीर्णस्तद्द्रक्ष्यत्याम्रपादपम् ।
भोक्ष्यते चेत्फलान्यस्य ततः प्राणैर्विमोक्ष्यते ॥ १४ ॥
इत्युक्त्वा व्यरमत्सापि तृतीयाभिदधे ततः ।
यद्येतदपि तीर्णो ऽयं तद्विवाहकृते गृहम् ॥ १५ ॥
प्रविष्टश्चेत्तदेवास्य हन्तुं पृष्ठे पतिष्यति ।
उक्त्वेति न्यवृतत्सापि चतुर्थी व्याहरत्ततः ॥ १६ ॥
अतो ऽपि यदि निस्तीर्णस्तन्नक्तं वासवेश्मनि ।
प्रविष्टः शतकृत्वो ऽयं क्षुतं सद्यः करिष्यति ॥ १७ ॥
शतकृत्वो ऽपि यद्यस्य जीवेति न वदिष्यति ।
कश्चिदत्र ततश्चैष मृत्योर्वशमुपैष्यति ॥ १८ ॥
येन चेदं श्रुतं सो ऽस्य रक्षार्थं यदि वक्ष्यति ।
तस्यापि भविता मृत्युरित्युक्त्वा सा न्यवर्तत ॥ १९ ॥
वणिक्सुतश्च तत्सर्वं श्रुत्वा निर्घातदारुणम्[1] ।
स तस्य राजपुत्रस्य स्नेहोद्विग्नो व्यचिन्तयत् ॥ २० ॥
उपक्रान्तामनाख्यातां धिक्कथां यदलक्षिताः ।
देवताः श्रोतुमायाताः शपन्त्यस्तु कुतूहलात्[2] ॥ २१ ॥

1) § 317b. 2) Je li शपन्त्यतिकुतूहलात्?



तदेतस्मिन्मृते राजसुते को ऽर्थो ममासुभिः ।
अतो ऽयं रक्षणीयो मे युक्त्या प्राणसमः सुहृत् ॥ २२ ॥
वृत्तान्तो ऽपि न वाच्यो ऽस्य मा भूद्दोषो ममाप्यतः ।
इत्यालोच्य निशां निन्ये स कृच्छ्रेण वणिक्सुतः ॥ २३ ॥
राजपुत्रो ऽपि स प्रातः प्रस्थितस्तत्सखः पथि ।
ददर्श पुरतो हारं तमादातुमियेष च ॥ २४ ॥
ततो ऽब्रवीद्वणिक्पुत्रो हारं मा स्म ग्रहीः सखे ।
मायेयमन्यथा नैते पश्येयुः सैनिकाः कथम् ॥ २५ ॥
तच्छ्रुत्वा तं परित्यज्य गच्छन्नग्रे ददर्श सः ।
आम्रवृक्षं फलान्यस्य भोक्तुं चैच्छन्नृपात्मजः ॥ २६ ॥
वणिक्पुत्रेण च प्राग्वत्ततो ऽपि स निवारितः ।
सान्तःखेदः शनैर्गच्छन्प्राप श्वशुरवेश्म तत् ॥ २७ ॥
तत्रोद्वाहकृते वेश्म विशन्द्वारान्निवर्तितः ।
तेनैव सख्या यावच्च तावत्तत्पतितं गृहम् ॥ २८ ॥
ततः कथंचिदुत्तीर्णः किंचित्सप्रत्ययो निशि ।
निवासकं विवेशान्यं राजपुत्रो वधूसखः ॥ २९ ॥
तत्र तस्मिन्वणिक्पुत्रे प्रविश्यालक्षितस्थिते ।
शतकृत्वः क्षुतं चक्रे शयनीयाश्रितो ऽथ सः ॥ ३० ॥
शतकृत्वो ऽपि तस्यात्र नीचैर्जीवेत्युदीर्य सः ।
कृतकार्यो वणिक्पुत्रो हृष्टः स्वैरं बहिर्ययौ ॥ ३१ ॥
निर्यान्तं तमपश्यच्च राजपुत्रो वधूसखः ।
ईर्ष्याविस्मृततत्स्नेहः क्रुद्धो द्वाःस्थानुवाच च ॥ ३२ ॥
पापात्मायं रहःस्थस्य प्रविष्टो ऽन्तःपुरं मम ।
तद्बद्ध्वा स्थाप्यतां यावत्प्रभाते ऽसौ निगृह्यते ॥ ३३ ॥
तद्बुद्ध्वा रक्षिभिर्बद्धो निशां निन्ये वणिक्सुतः ।
प्रातर्वध्यभुवं तैश्च नीयमानो ऽब्रवीत्स तान् ॥ ३४ ॥
आदौ नयत मां तावद्राजपुत्रान्तिकं यतः ।
वक्ष्यामि कारणं किंचित्ततः कुरुत मे वधम् ॥ ३५ ॥
इत्युक्तैस्तैन तैर्गत्वा विज्ञप्तः स नृपात्मजः ।
सचिवैर्बोधितश्चान्यैस्तस्यानयनमादिशत् ॥ ३६ ॥
आनीतः सो ऽब्रवीत्तस्मै वृत्तान्तं राजसूनवे ।
प्रत्ययाद्गृहपातोत्थान्मेने सत्यं च सो ऽपि तत् ॥ ३७ ॥
ततस्तुष्टः समं सख्या वधमुक्तेन तेन सः ।
आययौ राजतनयः कृतदारो निजां पुरीम् ॥ ३८ ॥
तत्र सो ऽपि सुहृत्तस्य कृतदारो वणिक्सुतः ।
स्तूयमानगुणः सर्वजनैरासीद्यथासुखम् ॥ ३९ ॥

# O metrici

Slogovi s kratkim samoglasnikom ispred jednog suglasnika *prozodijski su kratki*, slogovi s dugim samoglasnikom ili s kratkim samoglasnikom ispred više suglasnika *prozodijski su dugi*. Zadnji slog u stihu ili retku (pāda) uvijek je anceps (proizvoljno dug ili kratak). Svršetak pāde treba se poklapati s krajem člana složenice. — U uzorcima za čitanje pojavljuju se sljedeći metrički oblici:

1. *śloka*. Sastoji se od dva stiha, svaki stih od dva retka od po osam slogova. Prva i treća pāda završavaju na ⏑––⏓, druga i četvrta na ⏑–⏑⏓. Iza prvog sloga svake pojedine pāde ne mogu jedan za drugim slijediti dva kratka sloga. U parnim pādama slogovi 2 — 4 ne smiju imati mjeru –⏑– . Ostali slogovi mogu biti bilo kratki bilo dugi.

2. *Āryā*. Strofa āryā sastoji se od dva stiha. Svaki se stih dijeli na dva člana, a svaki član na stope koje se računaju prema morama. Obična stopa broji četiri more. Nijedna neparna stopa ne smije sadržavati raspored slogova ⏑–⏑. Shema prve strofe izgleda ovako:

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏑⏑⏑⏑ | ⏓ |
| –⏑⏑ | –⏑⏑ | –⏑⏑ | –⏑⏑ | –⏑⏑ | ⏑–⏑ | –⏑⏑ | |
| ⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– | ⏑⏑– | | ⏑⏑– | |
| – – | – – | – – | – – | – – | | – – | |
| | ⏑–⏑ | | ⏑–⏑ | | | | |

Isto tako i drugi stih, samo što se šesta stopa sastoji od |⏑|. Primjer, str. 91. redak 7.



# Rječnik

Kratice su objašnjene u uvodu knjige. p. u rječniku znači *particip gotovi* (§ 273). Brojevi označuju prezentske razrede, a brojevi u zagradama paragrafe. ° ispred ili iza riječi znači da se radi o prednjem ili stražnjem članu složenice.

*Poredak*: anusvāra i visarga stoje u alfabetskom slijedu ispred prvog suglasnika (क). — Glagole složene s prefiksima treba tražiti pod jednostavnim korijenom.

अ zamj. osn. § 119.
अ°, ispred samogl. अन्°, niječni prefiks = ne.
अकस्मात् neočekivano, iznenada.
अक्ष m. kocka za kockanje.
अक्षम nesposoban, nevješt.
अक्षय neprolazan.
अक्षौहिनी ž. vojska.
अग्नि m. vatra, bog vatre.
अग्र sr. vrh; L. pred (uz G.), ispred, naprijed.
अङ्कित raspoznatljiv, obilježen.
अङ्ग sr. član, ud, tijelo. U Bah. ž. ई.
अङ्गना ž. žena.
अङ्गसेवक m. poslužitelj tijela.
अङ्गुल m. širina palca.
अचल nepokretan; m. brdo, gorje.
अजस्रम् pril. neprestance.
अजा ž. koza
अजानत् (ज्ञा) koji ne zna, bez znanja.
अञ्जलि m. dlanovi spojeni da prave šupljinu.
अट् 4. lutati.
अण्ड sr. jaje.
अण्डज m. ptica.
अतन्द्रित neumoran
अतस् (Ab., § 59) stoga, otuda, zato.
अति° nad–, jako, osobito, izuzetno.
अतिथि m. gost.
अतिरेक m. višak.
अतीत sr. prošlost.
अतीव vrlo.
अत्र L. od osnove अ (113 nap.), ovdje, tamo; pritom.
अत्वरा ž. nehitnja, ne žurba.
अथ sada, netom, i; अथवा ili, ili mnogo više, pa da; ali kada.

अद् 2. jesti, žderati.
अदर्शन sr. negledanje.
अदस् § 120.
अदृश्य nevidljiv.
अदृष्ट neviđen, neopažen.
अद्भुत začuđujući.
अद्य danas, sada.
अधर m. donja usna, usna.
अधस्तात् ispod, niže, pod (s G.).
अधिक veći, čvršći, više od.
अधिप m. gospodar, vladar
अधिष्ठान sr. mjesto.
अधुना sada.
अधोमुख (bah.), ž. ई, s licem pognutim prema zemlji.
अध्याय m. odlomak.
अध्वन् m. put.
अन्° v. अ°.
अनघ bezgrešan, bez krivnje.
अनन्त beskonačan, beskrajan.
अनन्तरम् odmah nakon (slož.).
अनपत्य, ž. आ, bez djece.
अनर्थ m. nesreća, šteta.
अनवद्य besprijekoran, bezgrešan.
अनशन sr. nejedenje, post.
अनागत sr. budućnost.
अनागतवत् što odgovara budućnosti.
अनादि koji nema početka.
अनामय sr. zdravlje
अनायक koji nema vođe, nevođen
अनारतम् neprestano.
अनिच्छत् koji ne želi, nežudan.
अनुग्रह m. naklonost, sviđanje
अनुचर m. poslužitelj, sluga.
अनुव्रत odan, dosljedan vjeran.
अनुष्ठान izvršenje
अनुष्ठित v. स्था + अनु.
अनुसारिन् koji slijedi, sljedbenik.
अनृत netočan, neistinit, nepravedan.
अनेक mn. mnogi.
अन्त m.sr. kraj, rub, cilj; rješenje, अन्तं गम् otkrivati.
अन्तःखेद m. nezadovoljstvo u srcu.
अन्तःपुर sr. ženske odaje.
अन्तकर koji čini kraj.
अन्तकाल m. smrtni čas, vrijeme smrti.
अन्तर sr. međuvrijeme, prigoda; razlika; na kraju slož.: drugi.
अन्तरपूरुष m. duša, savjest.
अन्तरात्मन् m. duša, srce.
अन्तरिक्ष sr. ozračje, °ग m. ptica
अन्तिक sr. blizina.
अन्ध slijep अन्धीभू oslijepiti.
अन्न sr. hrana.
अन्य (116) drugi; अन्यस्मिन्नहनि jednog dana. — अन्यच्च i drugi, nadalje.
अन्यतम jedan od mnogih
अन्यतस् drugdje, na drugi način.
अन्यथा drukčije, inače.
अन्योन्य međusoban; °म् pril. uzajamno .
अन्वित v. इ + अनु.



अप् ž. mn. (102) voda, vode.
अपण्डित neuk.
अपत्य sr. dijete.
अपर (118) drugi; °म् nadalje, osim toga.
अपराङ्मुख koji ne odvraća lice, nestrašljiv.
अपराध m. krivnja.
अपसद m. izbacivanje, izbačaj.
अपि također, upravo još, također samo, svakako; ali, i. Iza upitnih riječi § 121. Iza brojeva i njihovih izvedenica = svih...
अप्रज bez djece.
अप्रतिम neusporediv.
अप्रतिषिद्ध (सिध्) nezabranjen.
अप्रिय nedrag, neugodan (uz G.).
अबल slab, nemoćan.
अब्द m. godina.
अभाग्य sr. nesreća.
अभाव m. nedostatak.
अभिधा ž. ime. Kraj bhvr. = zvan.
अभिभाषिन् koji govori.
अभिमुख, pril. °खम्, koji se okreće, od – k.
अभिहित v. धा + अभि.
अभीप्सु koji želi, teži za (uz A.).
अभ्यास m. vježba.
अभ्र sr. oblak.
अमर besmrtan; °वत् poput boga.
अमु § 120.
अमृत sr. piće besmrtnosti, nektar.
अय् 1. Ā. + पला bježati.
यम् § 119.
prikladan, neprimjeren.
योनि koji nema porijeklo.
अरक्षितृ koji nema čuvara, nije čuvan.
अरण्य sr. šuma.
अरत्न koji nema dragulja.
अर्क m. Sunce.
अर्च् 10. častiti.
अर्जित zarađen, stečen
अर्थ m. stvar, vlasništvo; novac; korist, svrhovitost, dobitak čega (I.) A. D. L. za, zbog, radi.
अर्थय den. moliti, zahtijevati.
प्र– tražiti, moliti, zahtijevati.
अर्थवत् bogat.
अर्थिन् koji stremi k, koji žudi za (I.), koji ima molbu.
अर्दित povrijeđen.
अर्ध pola; sr. polovica.
अर्पय v. ऋ.
अर्ह् 1. smjeti, moći, trebati.
अलक्षित neoznačen
अलम् dovoljno, dosta s, gotovo s (uz I.); v. कृ.
अलीक nepoželjan, sudbonosan.
अल्प mali, neznatan.
अवट m. jama.
अवयव m. udo, član, dio.
अवश koji ne želi, nevoljan.
अवस्था ž. stanje.
अविकल्पम् pril. nerazmišljajući.
अविद्वस् koji ne zna, neuk.

अविशङ्क koji ne oklijeva, ne neodlučan.
अव्यय stalan, postojan, neprolazan.
अश् 5. dosegnuti.
अशक्त i अशक्नुवत् nemoćan.
अशुचि nečist.
अशुभ slab, loš; nepristojan sr. zlo .
अशृण्वत् koji ne sluša, neslušajući.
अशेष bez ostatka, čitav, sav.
अशोच्य kojeg/što ne treba žaliti.
अश्रु sr. suza.
अश्व m. konj.
अश्विन् m. dv. ime dvaju božanstava.
अष्टगुण osmerostruk.
अस् 2. biti, živjeti.
असंतोष m. nezadovoljstvo.
असंभाव्य neispunjiv, neostvariv.
असती ž. nevjerna žena.
असत्य neistinit, kriv.
असाध्य neizvediv, nedostiživ, nezdrav, kojega nije dobro činiti.
असार bezvrijedan.
असि m. mač.
असु m. mn. život.
असौ § 120.
अस्तम् s गम् zaći.
अस्मत्तः ablativ od वयम् §111·
अस्मदीय naš
अह् reći, (211)
प्र – reći, izgovoriti.
अहन् sr. (100) dan.
अहम् §111.
अहिच्छत्त्र ime zemlje.
अहो uzvi – ah! hej! oh!

आकाश m. zračni prostor, ozračje.
आकिंचन्य sr. potpuno siromaštvo.
आकुल ispunjen s, bogat čime; potišten, ožalošćen.
आकृति ž. oblik.
आख्या ž. ime.
आगमन sr. dolazak
आटोप m. nadimanje.
आढ्य bogat čime .
आत्मज m. sin.
आत्मन् m. duša, nutrina; sopstvo.
आत्मस्वरूप vlastit oblik – stanje.
आदि m. početak; L. prvo, na početku. na kraju bah.: koji počinje s = itd.; इत्यादि tako i ostalo.
आदितस् kao prvo.
आदित्य m. Sunce; °वत् kao Sunce.
आद्य prvi; u bah. = आदि .
आनन sr. lice.
आनयन sr. dovođenje.
आप् 5. dosegnuti; – osnova u deziderativu ईप्स् (260) žudjeti, smjerati; – p. ईप्सित željen, voljen od (G).



प्र – dosegnuti, steći, dobiti, doći do; p. प्राप्त postignut, dosegnut, stečen.
आपद् ž. nesreća.
आप्त pouzdan, zajamčen, poznat.
आभरण sr. ukras.
आभ्यन्तर unutarnji
आम्र m. mango.
आयत v. यम् + आ.
आयुःशेषता ž. preostalost života, ostatak života.
आयुध sr. oružje.
आयुस् sr. život.
आरम्भ m. poduzimanje, poduhvat (posebno ratni).
आराधन sr. stjecanje, dobivanje.
आरोह m. kuk, bedro.
आर्त mučen.
आर्द्र vlažan, mokar
आर्य uzvišen, plemenit; m. plemić
आलाप m. razgovor.
आशा ž. nada.
आशु brz, hitar; sr. koristi se kao prilog.
आस् oh! uh!
आस् 2. Ā. (ep. i ) sjediti, zadržati se, suobraćati s kime.
पर्युप – okružiti, opsluživati.
आसन sr. sjedalo.
आसन्न v. सद् + आ.
आहार m. hranjenje.
इ 2. (152) ići, doći.
अनु – p. praćen, obdaren s, pun čega.
समनु – p. obdaren, pun.
अभि – ići, dolaziti, doći, prići.
समभि – doći.
